ISSN0976-9315


# आन्वीक्षिकी

(मूल्याङ्किता त्रैमासिकी शोधपत्रिका)

वर्षम्
१३

अक्टूबर २०१६ - मार्च २०१७


अङ्कः
०३-०४





सम्पादकः
गिरधरसिंह भाकुनी
सचिवः





प्रकाशकः
उत्तराखण्ड संस्कृत अकादमी
हरिद्वारम् (उत्तराखण्डम्)

आन्वीक्षिकी ( मूल्याङ्किता त्रैमासिकी शोधपत्रिका ), ISSN 0976-9315
अक्टूबर २०१६-मार्च २०१७, वर्षम् १३, संयुक्ताङ्कः ( ०३-०४ ), पृ.सं. ११-२५

# ३. विष्णुपुराणे अद्वैतदर्शनचिन्तनम्

जानकीशरण दासः *

**किञ्चित् प्रास्ताविकम्-**

**'ऋचः सामानि यजूंषि'**[1]**। सा हि श्रीरमृता सताम्'** इत्यादिश्रुतयः, **'पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्'**[2] इत्यादिस्मृतयश्च भूतभवद्भविष्यदर्थसाधको वेद एव भारतीयानामनर्घ्यः अक्षयश्च शेवधिरिति बाभाषन्ते। कर्मोपासनज्ञानकाण्डादिरूपेण विभक्तोऽयमाम्नायः प्राणिमात्रस्य अभ्युदयनिःश्रेयससाधको वर्तते। परन्तु वेदवाङ्मयस्य यथार्थज्ञानं न तावत् सुलभम्। अल्पं कोशव्याकरणादिज्ञानमासाद्य, यो वेदार्थाऽऽविष्करणाय प्रयतते, तस्य प्रवृत्तिः मदोत्कटं करिणं कमलनालेन निग्रहीतुं प्रयतमानस्य प्रवृत्तिरिव निष्फलैव। अतो वेदेषु निगूढानां तत्त्वानां सविस्तरं सरलैराख्यानादिभिः मृद्व्या च भाषया लौकिकानामपि बोधनाय इतिहासपुराणानि प्रादुर्बभूवुः। उक्तं चाभियुक्ततरैः-

**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।**
**बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरेदिति॥**[3]

इति वेदानां समुपबृंहकत्वेन पुराणसाहित्यस्य वेदोपकारकत्वम्। अपि च 'त्वया खलु पुराणानि सेतिहासानि चानघ'[4] इत्यादिवाक्याद् इतिहासस्यापि पुराणसहचरत्वमस्त्येव, तेन तस्यापि वेदोपकारकत्वम्। एतेषां पुराणानां विषयं विवृण्वद् विष्णुपुराणं निर्दिशति-

**स आख्यानैरुपाख्यानैर्गाथाभिः कल्पशुद्धिभिः।**
**पुराणसंहिताञ्चक्रे पुराणार्थविशारदः॥**[5]

भगवान् महाविष्णुरेव खलु व्यासरूपेण भुवमलङ्कृत्य, अध्ययनानुष्ठासौकर्याय ऋग्यजुस्सामाथर्वभेदेन वेदं विव्यास। स एव चाकारणकरुणावरुणालयो वेदार्थोपबृंहणाय पुराणानि प्रणिनाय, तानि स्वशिष्यं रोमहर्षणं ग्राहयामास। अत्रेदमप्युच्यते यद्यथा एको यजुर्वेदो द्वापरादौ चतुर्धा विभक्तो वर्तते तथैव पुराणसंहिताऽपि पुरा एकैवासीत्। तां संहितां सत्यवतीसुतो व्यासः स्वशिष्यं रोमहर्षणमध्यापयामास। सोऽपि कश्यपसृता कृतव्रणसावर्णिसंज्ञकां चतुरः शिष्यानध्यापयामास। ततस्याश्चतस्रः संहिता जाताः। ताश्च शिष्यप्रदायानुरोधेन च बह्वीषु संहितासु विभक्ताः। सम्प्रति तु पुराणानां सङ्ख्याऽष्टादशेति कथ्यते, येषु शैव-वैष्णव-ब्राह्म-आग्नेय-शाक्तसम्प्रदायाः वर्ण्यन्ते।[6]

पुराणेषु प्रतिपाद्यानां विषयाणां सूचिः दीर्घा वर्तते। पुराणानि हि भारतीयसंस्कृतेः विश्वकोषा एव विलसन्ति। भारतीयजीवनपद्धतेः सर्वोऽपि पक्षः पुराणेषु प्रतिपादितोऽस्ति। अपि च पुराणानां न केवलं

*सहायकाचार्यः ( दर्शनसंकायाध्यक्षः ), श्रीसोमनाथसंस्कृतविश्वविद्यालयः, सोमनाथः, गुजरातः

धार्मिकदृष्ट्यैव महत्त्वं वरिवर्ति, अपि तु ऐतिहासिक-भौगोलिक-सामाजिक-शास्त्रीयदृष्ट्यापि महत्त्वमपरिहार्यं वर्तते। वेदेषु सङ्क्षेपेण समग्रः सनाधनधर्मो व्याख्यातोऽस्ति किन्तु तस्य विस्तारः पुराणेषु दृश्यते। तस्मात् पुराणानि अनादृत्य नैव सनातनधर्मस्य गतिः। तथापि-

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चैवं पुराणं पञ्चलक्षणम्॥[७]**

इति वचनानुसारं, सर्गादिपञ्चविषयाः पुराणेषु प्राधान्येन प्रतिपादिताः। एतानि च लक्षणानि यत्र पूर्णतया उपलभ्यन्ते, तानि महापुराणानीति, कैश्चिदेतैः विहीनानि उपपुराणानीति च प्रथन्ते। एतैः सह वैदिकधर्मवृक्षस्य अपरिमिताः शाखाः पुराणपयसा प्रवृद्धिं जग्मुः। वेदोपवेदवेदाङ्गसांख्ययोगज्यौतिष-पूर्वोत्तरमीमांसासाहित्यसङ्गीतादिशास्त्रसम्बद्धाः भूयांसो विषयाः पुराणेषु प्रपञ्चिताः।

**पुराणेषु विष्णुपुराणस्य स्थानम्-**

पुराणप्रपञ्चे विष्णुपुराणं विशिष्टं स्थानं बिभर्ति। विष्णुपुराणमेकमेवैतादृशं पुराणं यत्र सर्वाण्यपि सर्गप्रतिसर्गादीनि दशैव लक्षणानि सङ्गच्छन्ते। महापुराणानां मध्ये पुराणमिदं तृतीयस्थाने तिष्ठति। अस्य साहित्यिकदार्शनिकैतिहासिकदृष्ट्या अपि महत्त्वं वर्तते। इदं हि पुराणं वैष्णवानां प्रधानं शास्त्रम्। विष्णुधर्मोत्तरपुराणमपि अस्यैव पुराणस्य कश्चन भाग इति केचिन्मन्यन्ते। विष्ण्वाख्यस्य परमात्मनः स्वरूपलीलावैभपरत्वात् अन्वर्थनामैतत्। एतच्च परमात्मनो दक्षिणभुजमिति पद्मपुराणे निरटङ्कि। अस्मिन् पुराणे विषयनिरूपणे स्फुटता, भाषायां मधुरता, अपेक्षितविषयाणामेव प्रतिपादनम्, अनपेक्षितविस्तरराहित्यम् इत्येवमस्य विशेषाः परिदृश्यन्ते। विविधेषु दर्शनेषु साहित्यधर्मशास्त्रादिग्रन्थेषु चास्य श्लोका उदाहृताः। आधुनिकविमर्शका अपि पुराणानां मध्ये इदमेव प्राचीनतममिति मन्यन्ते।

श्रीशङ्करभगवत्पादाः श्रुतीः क्वचित् स्मृतीश्च समाश्रित्य अद्वैतवेदान्तदर्शनं निरूपयन्तः न्यूनान्येव पुराणवचनानि उदाजह्रुः। विष्णुपुराणस्य वायुपुराणस्य च श्लोकाः क्वचित्तैरुदाहृता दृश्यन्ते। तै विष्णुपुराणं प्रमाणतया समाद्रियन्त इति प्रस्थानत्रयभाष्यावलोकनेन विज्ञायते। अन्यैरपि बहुभिरद्वैतिभिः विष्णुपुराणस्य श्लोकाः स्वग्रन्थेषु उदाहृताः समवलोक्यन्ते तेन पुराणमिदम् अद्वैततत्त्वगर्भितमिति स्फुटमेव प्रतीयते। सम्प्रति केषाञ्चित् अद्वैततत्त्वानां निदर्शनं विष्णुपुराणे पश्यामः।

**विष्णुपुराणे अद्वैततत्त्वानि-**

विष्णुपुराणे हि विष्णोः व्यापनशीलत्वात् विष्णुशब्दस्य निर्वचनमेवं श्रूयते-

**यस्माद्विश्वमिदं विष्टं तस्य शक्त्या महात्मनः।**
**तस्मात् स प्रोच्यते विष्णुर्विशेर्धातोः प्रवेशनात्॥[८]**

अत्र हि पुराणे विष्णुस्वरूपं द्वेधा वर्णितं दृश्यते। तत्रैकं समस्तभेदरहितम् अशेषविशेषशून्यं केवलसद्रूपं तत्त्वं, यद्धि वेदान्तेषु निर्विशेपपरब्रह्म इति निर्दिष्टम्। अपरं तु तस्यैव सर्वशक्तिविशिष्टं स्थूलप्रपञ्चाकारम् उपासनाकाङ्क्षितविशेषाश्रयाभूतं च रूपं, यत्किल वेदान्तेषु सगुणब्रह्मेति प्रपञ्चितम्। तत्र निर्गुणस्वरूपमित्थं वर्णितम्-

निर्व्यापारमनाख्येयं व्याप्तिमात्रमनौपमम्।
आत्मसम्बोधविषयं सत्तामात्रमलक्षणम्॥

प्रशान्तमभयं शुद्धमविभाव्यमसंश्रितम्।
विष्णोर्ज्ञानमयस्योक्तं तज्ज्ञानं परमं पदम्॥[९]

इत्युत्तमाधिकारिलभ्यं शुद्धब्रह्मस्वरूपमुक्त्वा, पुनस्तत् मन्दमध्यमाधिकारिणां न सुलभग्राह्यमिति स्थूलरूपमपि विवृतम्। तथा हि **'हिरण्यगर्भो भगवान् वासवोऽथ प्रजापतिः'**[१०] इत्यादिना चेतनाचेतनात्मकः प्रपञ्चः विष्णुरेवेति। विष्णुशब्देन विष्णोः निर्विशेषस्वरूपस्यैव पारमार्थिकत्वात्, तेन विष्णुना सह जीवस्य **'अहमेवाव्ययोऽनन्तः**[११]', **'अहं च वासुदेवः**[१२]' इत्यादिना अस्मिन्नपि पुराणे प्रतिपाद्यमानः अभेदोऽपि सङ्गच्छते। **'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्**[१३]' इति श्रुत्या विद्वान् विष्णोः परमपदमाप्नोतीति अभाषि। तथा च तत्र भाष्यम् 'अध्वनः संसारगतेः **पारं परमेव अधिगन्तव्यम्, इत्येतदाप्नोति मुच्यते सर्वसंसारबन्धनैः। तद्विष्णोः** व्यापनशीलस्य ब्रह्मणः **परमात्मनः वासुदेवाख्यस्य परमं प्रकृष्टं पदं स्थानं सतत्त्वमित्येयत् यदसौ आप्नोति विद्वान्**[१४]' इति। इदं च विदुषा प्राप्तव्यं वस्तु निर्विशेषं परं ब्रह्म इति वेदान्तेषु प्रसिद्धमेव। अतो विष्णोः परमं पदं निर्विशेषमेव ब्रह्मैव इत्यर्थः सिध्यति।

विष्णुशब्देन प्रतिपिपादयिषितस्य ब्रह्मणः रूपद्वयम् अद्वैतवेदान्तशास्त्रे बहुधा प्रतिपाद्यते। यथाऽऽहुः भाष्यकाराः **'द्विरूपं हि ब्रह्म अवगम्यते, नामरूपविकारभेदोपाधिविशिष्टं, तद्विपरीतं च सर्वोपाधिविवर्जितम्**[१५]' इति। तत्र निर्विशेषस्य प्राधान्यं च। वस्तुतो निर्गुणब्रह्मण उत्तमाधिकारिभिः सुलभग्राह्यत्वेऽपि मन्दमध्यमाधिकारिणां तु न तत् सकृद् बुद्धिपथमारोहति। सगुणवस्तुग्रहणाभ्यासबलात् मन्दानां लौकिकानां झटिति निर्गुणं ब्रह्म अवगन्तुं बुद्धिः न प्रवर्तते। सर्वान् जनिमतः समुद्धर्तुं प्रवृत्ता उपनिषल्लोकबुद्धिमनुसरन्ती ब्रह्मणः सगुणं निर्गुणं च रूपं प्रतिपादयति। एवं सति सगुणोपासनेन शुद्धायां बुद्धौ निर्विशेषब्रह्मस्वरूपम् अनुभवगोचरं **'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः**[१६]' इत्यादि श्रुत्यनुसारं भवितुमर्हति। अतो लौकिकानाम् अनुग्रहाय श्रुतिः ब्रह्मणः सविशेषं रूपमरुरूपत्। अतः परमार्थत एकरूपमेव ब्रह्म द्विरूपेण सङ्गीयते। एतद्विषये भाष्यकारा एवमाक्शासिषुः **'द्विरूपं हि ब्रह्म अवगम्यते, नामरूपविकारभेदोपाधिविशिष्टम्, तद्विपरीतं च सर्वोपाधिविवर्जितम्**[१७]' इति, **'निर्गुणमपि सद्ब्रह्म नामरूपगतैर्गुणैः सगुणमुपासनार्थं तत्र तत्रोपदिश्यते**[१८]' इति च। अपि च **'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि**[१९]' इति सूत्रमिदं सोपपत्तिव्याख्यास्यन् भाष्यकाराः- **'न तावत् स्वत एव परस्य ब्रह्मण उभयलिङ्गत्वमुपपद्यते। न ह्येकं वस्तु स्वत एव रूपादिविशेषोपेतं तद्विपरीतं चेति अवधारयितुं शक्यम्, विरोधात्**[२०]' इत्यूचिरे।

अत्र उपासनार्थमेव निर्गुणस्य ब्रह्मणः सगुणत्वं कल्पितम्। उपास्योपासकादिव्यवहारश्च भेदबुद्ध्याश्रितोऽविद्याऽवस्थायामेव भवति। सत्यां च विद्याप्राप्तौ सर्वविधक्रियाकारकनिर्मुक्तम् अद्वैतं ब्रह्मैव अवशिष्यते। अयमेवार्थः श्रुतावपि एवं शोश्रूयते **'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्**[२१]', **'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा**[२२]', **'निष्फलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्**[२३]', **नेति नेति**[२४]' इत्यादिना। अतः श्रुतिष्वाम्नातानि

सगुणब्रह्मवाक्यानि उपासनविध्यपेक्षितगुणारोपपराणि, निषेधापेक्षितनिषेध्यसमर्पकाणि वेति स्वीकर्तव्यानि, न तु गुणानां तात्त्विकत्वपराणीति। अतः ब्रह्मणः सगुणं रूपं मिथ्यैव। अमुमर्थं निरूपयन्तो भाष्यकारा उभयलिङ्गाधिकरणे एनां स्मृतिमुदाजह्रुः:-

माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद।
सर्वभूतगुणैर्युक्तं नैव मां ज्ञातुमर्हसि॥[२५]

अस्यां स्मृतौ मायापदं मिथ्यार्थबोधकम्। वस्तुतो मम निर्गुणत्वात्त्वद्दर्शनविषयभूतं सर्वभूतगुणैर्दिव्यगन्धादिभिर्युक्तं मां मूर्तिमन्तं पश्यसीति यत् सा माया, अत एव तादृशं मम रूपं मिथ्यैव इति श्लोकार्थः। यथा रज्जौ कल्पितस्सर्पो रज्ज्वभिन्नो भवति तथैव निर्गुणे ब्रह्मणि कल्पितं सगुणत्वं निर्गुणादभिन्नमिति ज्ञेयम्। अध्यस्तं हि वस्तु स्वाधिष्ठानान्न भिद्यते। अतः अध्यस्यवस्तुनो नष्टे सति अधिष्ठानमेवावशिष्यते। तथा च सम्प्रदायविचक्षणां वचः- **'अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः**[२६]**'** इति। तथा च स्वाध्यस्तनामरूपोपाधिमत्त्वमेव निर्गुणस्य सगुणत्वम्। अमुमेवार्थं प्रत्यपादयन्तः भाष्याकाराः **'परमेव हि ब्रह्म विशुद्धोपाधिसम्बन्धं क्वचित् कैश्चिद्विकारधर्मैः मनोमयत्वादिभिरुपासनायाम् उपदिश्यमानमपरमिति स्थितिः**[२७]**'** इत्यनेन।

एवमेव अन्येऽपि अद्वैतविषयाः पुराणेऽस्मिन् प्रपञ्चिताः वर्तन्ते। तद्यथा- निर्विशेषब्रह्मस्वरूपं, सविशेषब्रह्मस्वरूपम्, माया, मूर्तित्रयम्, साक्षी, सगुणस्य निर्गुणादभेदः, ब्रह्मणः जगत्कारणत्वम्, ब्रह्मणो निष्क्रियत्वम्, विवर्तोपादानत्वं विशुद्धत्वञ्च, सत्कार्यवादः, अद्वैतब्रह्मज्ञानस्य मोक्षहेतुत्वाद्या विषया अत्र उपवर्णिता वर्तन्ते। अपि च वेदान्तदर्शने प्रसिद्धानि तात्पर्यनिर्णयलिङ्गान्यपि अस्मिन् पुराणे दृश्यन्ते।

**उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।**
**अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥**[२८]

इत्यभियुक्तवचनानुसारम् उपक्रमोपसंहारादीनि षट् तात्पर्यनिर्णयलिङ्गानि। तत्र उपक्रमोपसंहारौ आरम्भावसाने, अभ्यासः आवृत्तिः, अपूर्वता प्रमाणान्तरेण अनधितत्वं, फलं प्रयोजनम्, अर्थवादः स्तुतिर्निन्दा वा, उपपत्तिस्तर्कः। एतेभ्योः हि प्राज्ञाः कस्यचिद्ग्रन्थस्य वाक्यस्य वा कुत्र तात्पर्यमिति निश्चिन्वन्ति। यथा छान्दोग्यषष्ठाध्याये **'एकमेवाद्वितीयम्**[२९]**'** इत्यद्वितीयब्रह्मरूपेण उपक्रमः। तेनैव रूपेण उपसंहारश्च **'स आत्मा तत्त्वमसि**[३०]**'** इति। **'एतेदात्म्यमिदं सर्वं तत्सत्यम्**[३१]**'** इति तस्मिन्नेवार्थे नवकृत्वः अभ्यासः। अस्य अद्वैततत्त्वस्य मानान्तरेण अज्ञातत्वात् अपूर्वत्वम्। एतदद्वैतब्रह्मज्ञानं सफलं च **'यावन्न विमोक्ष्येऽथ सम्पत्स्ये**[३२]**'** इति श्रवणात्। **'येनाश्रुतं श्रुतं भवति**[३३]**'** इत्यद्वैतज्ञानस्यैव स्तुतिः कृता। उपपत्तिस्तु कार्यस्य कारणादनन्यत्वं मिथ्यात्वं च मृत्युवर्णादिदृष्टानेन बोध्या। अतः अद्वैतब्रह्मपरमिदं प्रकरणमिति निर्णीयते।

इमानि तात्पर्यनिर्णायकलिङ्गानि विष्णुपुराणेऽपि समुपलभ्यन्ते। एतैः निर्णायकलिङ्गैः पुराणमिदं निर्विशेषमखण्डं ब्रह्मैव तात्पर्येण प्रतिपिपादयिषतीति निर्णीयते। तथा हि-

**अ उपक्रमः**- 'जितं ते पुण्डरीकाक्ष[३४]' विष्णुपुराणस्य द्वितीयः श्लोको भवति-

**सदक्षरं ब्रह्म य ईश्वरः पुमान् गुणोर्मिसृष्टिस्थितिकालसंलयः।**
**प्रधानबुद्ध्यादिजगत्पञ्चसूः स नोऽस्तु विष्णुर्मतिभूतिमुक्तिदः॥**[३५]

अत्र हि त्रिगुणात्मकमायाकल्पितजगदधिष्ठानं विष्णवाख्यं सन्मात्रं ब्रह्म निर्दिष्टम्। ततोऽग्रे पुराणबुभुत्सुः मैत्रेयः पराशरं पप्रच्छ-

**यन्मयं च जगद्ब्रह्मन् यतश्चैतच्चराचरम्।**
**लीनमासीद्यथा यत्र लयमेष्यति यत्र च॥**[३६]

अत्रापि जगदुत्पत्तिस्थितिकारणम् अभिन्ननिमित्तोपादानं तत्त्वं जिज्ञासितम्। तच्च तत्त्वं विष्णवाख्यं ब्रह्मैवेति वक्ता पराशरो बोधयामास-

**विष्णोः सकाशादुद्भूतं जगत्तत्रैव संस्थितम्।**
**स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः॥**[३७]

**आ- अपसंहारः-**

उपसंहारोऽपि अमुमेवार्थं गमयति। तत्र हि खाण्डिक्यकेशिध्वजसंवादो ग्रथितः। तत्र केशिध्वजः खाण्डिक्यं विष्णोः परमपदाख्यं निर्भेदं ब्रह्म एवमुपदिदेश-

प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम्।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम्॥

तच्च विष्णोः परं रूपमरूपस्याजमक्षरम्।
विशरूपाच्च त्रैरूप्यलक्षणं परमात्मनः॥[३८]

ततस्तत्र जीवब्रह्माभेदस्य तात्त्विकत्वं, भेदस्य आविद्यकत्वं चैवमकथिपाताम्-

तद्भावभावनाऽऽपन्नस्ततोऽसौ परमात्मना।
भवत्यभेदी भेदश्च तत्राज्ञानकृतो भवेत्॥

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥[३९]

**इ - अभ्यासः-**

षष्ठांशात्मके विष्णुपुराणे आद्यन्तयोरंशयोः अद्वैतं ब्रह्म निर्दिदिश इति दर्शितम्। यथा द्वितीयांशे-

**एकः समस्तं यदिहास्ति किञ्चित्तदच्युतो नास्ति परं ततोऽन्यत्।**
**सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम्॥**[४०]

तृतीयांशेऽपि निरटङ्कि-

शुक्लादिदीर्घादिघनादिहीनमगोचरे यच्च विशेषणानाम्।
शुद्धातिशुद्धपरमर्षिदृश्यरूपाय तस्मै भगवन्नताः स्म॥[४१]

चतुर्थेऽपि जगदे-

यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते।
यत्रावतीर्णं विष्णवाख्यं परं ब्रह्म निराकृति॥[४२]

पञ्चमे त्वेवमाख्यायि-

त्वमव्यक्तमनिर्देश्यमचिन्त्यानामवर्णवत्।
अपाणीपादरूपं च शुद्धं नित्यं परात्परम्॥[४३]

**ई अपूर्वता-**

निर्गुणं वाचामगोचरं ब्रह्मात्मैक्यतत्त्वं प्रमाणान्तरेण न ज्ञातं, किन्तु आचार्योपदेशेनैव अवगम्यते। इदमपूर्वत्वं पराशरं पृच्छतः मैत्रेयस्य, भरतं पृच्छतः सौवीरस्य च वचने परिलक्ष्यते। तथा हि-

निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः।
कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते॥[४४]

यत्त्वेतद्भवता प्रोक्तं कोऽहमित्येतदात्मनः।
वक्तुं न शक्यते श्रोतुं तन्ममेच्छा प्रवर्तते॥[४५]

**उ फलम्-**

निर्विशेषब्रह्मात्मैक्यज्ञानं सफलमित्यपि पुराणे प्रपञ्चितम्। फलं च अद्वैतब्रह्मप्राप्तिरूपा मुक्तिः। तथा हि ऋभोः सकाशात् सम्प्राप्ताद्वैततत्त्वोपदेशः निदाघः मुक्तिमवापः इति प्रादर्शि-

एवमुक्त्वा ययौ विद्वान्निदाघं स ऋभुर्गुरुः।
निदाघोऽप्युपदेशेन तेनाद्वैतपरोऽभवत्॥

सर्वभूतान्यभेदेन ददृशे स तदात्मनः।
यथा ब्रह्मपरो मुक्तिमवाप परमां द्विज॥[४६]

खाण्डिक्योऽपि केशिध्वजात् **'विभेदजनकेऽज्ञाने..**[४७]**'** इत्यद्वैततत्त्वोपदेशं सम्प्राप्य, तत्त्वज्ञानोपायभूतं योगं च ज्ञात्वा, अन्ते विष्ण्वाख्यं ब्रह्म समवाप इत्यवर्ण्यत पुराणे।

**ऊ अर्थवादः-**

पुराणेऽस्मिन् विभिन्नोपाख्यानद्वारा अद्वितीयब्रह्मज्ञानप्रशंसा कृता। यथा प्रह्लादोपाख्याने **'अहमेवाव्ययोऽनन्तः परमात्मेत्यचिन्तयत्**[४८]**'** इति प्रह्लादस्य ध्यानं दर्शयित्वा, **'परं निर्वाणमाप्तवान्**[४९]**'** इति तस्य मोक्षप्राप्तिं च कथयित्वा, प्रह्लादचरितं श्रुतवताम्-

यस्त्वेतच्चरितं तस्य प्रह्लादस्य महात्मनः।
शृणोति तस्य पापानि सद्यो गच्छन्ति संक्षयम्॥[५०]

इति पापक्षयरूपफलसंकीर्तनद्वारा प्रह्लादचरितगतम् अद्वैततत्त्वं संस्तुतम्।

**ऋ उपपत्तिः-**

पुराणे जगतो ब्रह्मानन्यत्वं, जगतो मिथ्यात्वं, भेदस्य औपधिकत्वम् इत्येवं नैकेषु विषयेषु उपपत्तिप्रदर्शनद्वाराऽपि अद्वितीयं ब्रह्म उपदिष्टम्। तद्यथा यद्यस्मात् उत्पन्नं, तत्ततोऽभिन्नं, यथा मृदुपादानको घट इति न्यायमाश्रित्य, ब्रह्मोपादानकस्य जगतो ब्रह्मानन्यत्वं समसाधि। यथाऽभ्यधायि **'एवं विश्वस्य**

**नान्यत्वं त्वत्स्थायीश्वर दृश्यते**[५१] इति। अत्र स्वोपादानतया ब्रह्मण्येव प्रपञ्चः स्थित इति त्वत्स्थायिपदेन अभाणि। एवमेव यज्जन्यं तत्र सत्, यथा घट इति न्यायमाश्रित्य, अचेतनस्य जन्यस्य जगतो मिथ्यात्वमाख्यातम्-

**त्वं राजा शिबिका चेयमिमे वहाः पुरस्सराः।**
**अयं च भवतो लोके न सदेतन्नृपोच्यते॥**
**शिबिका दारुसंघातो रचनास्थितिसंस्थितः।**
**अन्विष्यतां नृपश्रेष्ठ तद्भेदे शिबिका त्वया॥**[५२]

## सन्दर्भाः पादटिप्पण्यश्च


१. तैत्तिरीयब्राह्मणम् १.२.१.६
२. मनुस्मृतिः, १२.९४
३. महाभारतम्, चि. १.२६७
४. भागवतपुराणम्, १.१.६
५. विष्णुपुराणम्, ३.६.१५
६. संस्कृतसाहित्येतिहासः-लोकमणिदहालः, पृ. ६१
७. विष्णुपुराणम्, ३.६.२७
८. विष्णुपुराणम्, ३.१.४५
९. विष्णुपुराणम्, १.२२.४९-५०
१०. विष्णुपुराणम्, ६.७.५६
११. विष्णुपुराणम्, १.२०.२
१२. विष्णुपुराणम्, ३.७.३२
१३. कठोपनिषद्, ३.९
१४. कठोपनिषच्छाङ्करभाष्यम्, ३.९
१५. ब्रह्मसूत्रशाङ्करभाष्यम्, १.१.१२
१६. कठोपनिषद् १.३.१२
१७. ब्र.सू.शां.भा. १.१.११
१८. तत्रैव १.२.१४
१९. ब्रह्मसूत्रम् ३.२.११
२०. ब्र.सू.शां.भा. ३.२.११
२१. बृहदारण्यकोपनिषद् ४.५.१५
२२. छान्दोग्योपनिषद् ७.२४.१
२३. श्वे.उ. ६.१९
२४. बृहदारण्यकोपनिषद् २.३.६
२५. महाभारतम् १२.३३९.४५
२६. सूत.सं. ४.२.८
२७. ब्र.सू.शां.भा. ४.३.९
२८. सर्वदर्शनसङ्ग्रहः, पृ. ६०
२९. छान्दोग्योपनिषद्, ६.२.१
३०. छान्दोग्योपनिषद्, ६.८.७
३१. छान्दोग्योपनिषद्,६.८.७
३२. छान्दोग्योपनिषद्, ६.१४.२
३३. छान्दोग्योपनिषद्, ६.१.३
३४. विष्णुपुराणम्, १.१.१
३५. विष्णुपुराणम्, १.१.२
३६. विष्णुपुराणम्, १.१.९
३७. विष्णुपुराणम्, १.१.३५
३८. विष्णुपुराणम्, ६.७.५४-५४
३९. विष्णुपुराणम्, ६.७.९३-९४
४०. विष्णुपुराणम्, २.१६.२३
४१. विष्णुपुराणम्, ३.१७.३२
४२. विष्णुपुराणम्, ४.११.४
४३. विष्णुपुराणम्, ४.१.४०
४४. विष्णुपुराणम्, १.३.१
४५. विष्णुपुराणम्, २.१३.८४
४६. विष्णुपुराणम्, २.१६.१९-२०
४७. विष्णुपुराणम्, ६.७.९३
४८. विष्णुपुराणम्, १.२०.२
४९. विष्णुपुराणम्, १.२०.३४
५०. विष्णुपुराणम्, १.२०.३६
५१. विष्णुपुराणम्, १.१२.६९
५२. विष्णुपुराणम्, १.१३.९२, ९५